International Journal of Sanskrit Research 2015; 1(5): 06-10

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2015; 1(5): 06-10
© 2015 IJSR
www.sanskritjournal.com
Received: 10-05-2015
Accepted: 11-06-2015

**Seema Verma**
Research Scholar,
Sarvadarshan Dept, Shri Lal Bahadur Shastri rashtriya Sanskrit Vidyapeetha Katwaria sarai,
New delhi-110016, India.

**Correspondence**
**Seema Verma**
Research Scholar,
Sarvadarshan Dept, Shri Lal Bahadur Shastri rashtriya Sanskrit Vidyapeetha Katwartia sarai,
New delhi-110016, India.

# वेदान्तदर्शने चैतन्यस्वरूपम्

**Seema Verma**

### भूमिका

दर्शनशास्त्रेषु वेदान्तदर्शनस्य स्थानं सर्वोच्चं महत्त्वपूर्णं च विद्यते । तेष्वपि अद्वैतवेदान्तदर्शनं सर्वेषां दर्शनानां शिरोमणिरस्ति। यद्यपि अद्वैतपदस्य योगः अन्येष्वपि वेदान्तेषु दरीदृश्यते, यथा – विशिष्टाद्वैतवादः, शुद्धाद्वैतवादः, द्वैताद्वैतवादः, शक्त्याद्वैतवादः, शैवाद्वैतवादः, शब्दाद्वैतवादादयश्चेति। परन्तु एषु समस्तसिद्धान्तेषु आचार्यशंकरस्याद्वैतवादस्य यादृशं पूर्णतया सैद्धान्तिकं सुव्यवस्थितं सामञ्जस्यपूर्णञ्च प्रतिपादनमुपलभ्यते तादृशं अन्येषां वेदान्तदर्शनानां नास्तीति। अत एव वक्तुं शक्यते दर्शनक्षेत्रे शांकराद्वैतवादस्यैव सर्वाधिकं महत्त्वं वर्तते। अस्याद्वैतवेदान्तदर्शनस्य तात्पर्यं वर्तते- तत् शास्त्रं ज्ञानं वा यत् परमार्थतः भेदशून्यानां द्वैतविरोधिवस्तुतत्त्वानां वा दिग्दर्शनं कारयति करोति वा।

वाचस्पत्यमानुसारेण अद्वैतशब्दस्य निर्वचनं वर्तते – द्विधा इतं द्वीतं,तस्यभावो द्वैतम्, द्वैतं – भेदः,भेदो नास्ति यत्र तदद्वैतम्, अर्थात् द्वैतं नाम द्वैतविरोधि भेदशून्यं वा। अनेन ज्ञायते यत् द्वैतनिषेधस्य अयं सिद्धान्तः। अस्मिन् दर्शने अद्वैतप्रतिपादनादधिकं द्वैतनिषेधे प्रवृत्तिः दृश्यते। यद्यपि उपनिषत्सु, संहितासु अद्वैतसिद्धान्तः निहितः वर्तते, तथापि अद्वैतवेदान्तस्य व्यवस्थितं स्वरूपं सर्वादौ गौडपादस्य दर्शने द्रष्टुं शक्यते। आचार्य गौडपादः आचार्यशंकरस्य गुरोः गोविन्दभगवत्पादस्य गुरोःआसन्। आचार्यशंकरः स्वयं गौडपादं पूज्याभिपूज्यपरमगुरुः इत्युक्त्वा अत्यन्तादरेण प्रणमति -

“यस्तं पूज्याभिपूज्यं परमगुरुममुं पादपातेनतोऽस्मि” [1]

ब्रह्मसूत्रभाष्ये [2] ऽपि तं वेदान्तसम्प्रदायवित् आचार्यः उक्त्वा तेषां कारिका उद्धृता।

परन्तु प्रस्थानत्रयीभाष्ये आचार्यशंकरेण इदं अद्वैतसिद्धान्तत्वेन मूर्तस्वरूपं प्रदत्तं। यस्य परम्परा परवर्ती दार्शनिकसाहित्ये दरीदृश्यते। दार्शनिकचिंतनस्य प्रतिफलं अद्वैततत्त्वं सर्वप्रथमं आचार्यशंकरस्य कृतिषु एव उपलभ्यते। प्रस्थानत्रयीषु अद्वैतचिन्तनस्य स्वरूपं स्पष्टरूपेण परिलक्षितं किन्तु अस्य परिष्कारं, परिमार्जनं विधाय श्रुत्या- युक्त्या च निर्भान्त साधनस्य अपूर्वः अद्वितीयश्च प्रयासः आचार्यशंकरेणैव कृतः। आचार्यशंकरः प्रस्थानत्रयस्य अनुपमः व्याख्याता वर्तते। तत्र आचार्यैः सृष्टेः विवेचनमपि कृतं, अथ च नाना प्रपञ्चात्मकस्य जगतः मिथ्यात्वमपि साधितम्। कथमुभयोः सामाञ्जस्यं स्यात्? सृष्टिः सत्यमस्ति चेत् जगतप्रपञ्चः मिथ्या कथं वक्तुं शक्यते। अद्वैतब्रह्म निर्गुण- निराकारः अस्ति चेत् जगतः स्रष्टा कथं भवितुमर्हति। अद्वैतं पुनः सत्यं तर्हि नानात्वेन प्रतीयमानाः ज्ञानेन्द्रियाणां प्रत्यक्षभुताः विषयाः कथं निषेधव्याः। इत्यादयाः नैके जिज्ञासाः मनसि जायन्ते, तेषां सर्वेषां समाधानं आचार्यशंकरः प्रस्थानत्रयीभाष्येन स्वानुभूत्या, तर्केण श्रुत्या वा विधाय अद्वैतवादं व्यवस्थापितवान्। यस्य प्रवाहेन सर्वे द्वैतादि वादाः प्रवाहिताः। अत्र प्रश्नः स्वाभाविकः यत् अद्वैतमहासागरे कथं द्वैतधाराः निस्सरति, नैकेषां वादानां प्रवाहेऽपि कथं अद्वैतं ब्रह्म निर्विकारः अपरिवर्तितः तिष्ठति एतेषां विषयाणामत्र विवेचनं प्रस्तूयते।

### चैतन्यस्वरूपम् (ब्रह्म)

भरतीयदार्शनिकपरम्पराषु चैतन्यस्य स्वरूपप्रतिपादनपुरःसरं नैके मतानि दर्शनानि च प्रवर्तितानि सन्ति। तेषु न्याय- वैशेषिक-साख्य-योग-जैन-बौद्धादि दर्शनानि, अथ च रामानुज-मध्व-वल्लभ-निम्बार्क-शैव-शाक्तादि दार्शनिक परम्पराः। ते खलु स्व-स्व मतानुरोधेन चैतन्यतत्त्वस्य विवेचनं कुर्वन्ति। तत्र आचार्यशंकरः पारमार्थिकदृष्ट्या एकमात्रं विशुद्धचैतन्यमेव स्वीकरोति। यत् सत्, अद्वितीयं, शुद्धं, ज्ञानस्वरूपं, निर्मलं, शान्तं, आद्यन्तरहितं, निष्क्रियं, आनन्दञ्च वर्तते।

अतः परं ब्रह्म सदद्वितीयं, विशुद्धविज्ञानघननिरञ्जनम्।
प्रशान्तमाद्यन्तविहीनमक्रियां, निरन्तरानन्दरसस्वरूपम् [3] ॥

परम्पराः। ते खलु स्व-स्व मतानुरोधेन चैतन्यतत्त्वस्य विवेचनं कुर्वन्ति। तत्र आचार्यशंकरः पारमार्थिकदृष्ट्या एकमात्रं विशुद्धचैतन्यमेव स्वीकरोति। यत् सत्, अद्वितीयं, शुद्धं, ज्ञानस्वरूपं, निर्मलं, शान्तं, आद्यन्तरहितं, निष्क्रियं, आनन्दञ्च वर्तते।

अतः परं ब्रह्म सदद्वितीयं, विशुद्धविज्ञानघननिरञ्जनम्।
प्रशान्तमाद्यन्तविहीनमक्रियां, निरन्तरानन्दरसस्वरूपम् [3] ॥

तस्य च चैतन्यस्य स्वरूपं प्रकाशयति आचार्य शंकरः – विशुद्धचैतन्यस्वरूपं ब्रह्म सकलमायिकभेदशून्यः, नित्यः, सुखस्वरूपः, अरूपः, स्वयं प्रकाशमानश्च वर्तते।

तद्ब्रह्म ज्ञाता-ज्ञान-ज्ञेयत्रिपुटीशून्यः अनन्तः, निर्विकल्पः, अखण्डचैतन्यमात्रमेव। तादृशः अविषयः, अप्रमेयः, अन्तररहितः पूर्णब्रह्म अहमेव।

अहेयमनुपादेयं मनोवाचामगोचरम्।
अप्रमेयमनाद्यन्तं ब्रह्मपूर्णमहं महः॥ [4]

एवं आचार्यशङ्करः आत्मब्रह्मणोः अभेदमङ्गीकुर्वन्ति। आत्मस्वरूपब्रह्म देश[5]-काल[6]-वस्तु[7] त्रिविधपरिच्छेदरहितः भवति।

ब्रह्मणः द्वयोः रूपयोः विवेचनं आचार्यशंकरेण ब्रह्मसूत्रभाष्ये कृतं –परब्रह्म-अपरब्रह्मेति। यस्योपदेशः श्रुतिषु अविद्याकृतनामरूपाभ्यां निषेधात्मकं कृतं तत् परब्रह्म, यस्य च नामरूपादि विशेषणैः विशिष्टमाणः उपासनादि निमित्तं "मनोमयः प्राणशरीरो भारूपः"[8] इत्यादिभिः उपदिश्यते स च ब्रह्म अपरब्रह्म। विशुद्धचैतन्यं एकमेव, तर्हि उच्चावचप्रपञ्चं कथं प्रतिभासितो भवति इति चेत्- तस्य समाधाने आचार्यशंकरः श्रुत्या-युक्त्या-अनुभवेन च एका बीजभूता परमात्मशक्तेः सद्भावं स्वीकृतवान्, यस्य व्यपाश्रयेण अद्वयब्रह्म अस्य नामरूपात्मकस्य प्रपञ्चस्य जगतः कारणतां निर्वहति। सा शक्ति माया यन्नसन्नाप्यसदस्ति, "भूयश्चान्ते विश्वमायानिवृत्तिः"। तत्त्वज्ञानेनैव तस्य निवृत्तिः सम्भवात्।

आचार्यशंकरेण तत्तत् स्थले ब्रह्मसूत्रभाष्ये मायायाः अनादित्वं, अनिर्वचनीयत्वं, त्रिगुणात्मिकात्वं, भावरूपत्वं, नैसर्गिकत्वं च साधितम्। अनया शक्त्या एव ईश्वरः इदं कार्यप्रपञ्चं सृजति। अविद्यायाः कार्यं वर्तते परत्रपरावभासरूपाध्यासः। "अविद्यया संवृत्तं सन्नलक्ष्यते तत्रस्थमेवाविद्भिः"[9] । अस्य मायिक जगतः आविर्भावस्य मुले अविद्यायाः अज्ञानस्य वा आवरणविक्षेपनाम्ना शक्तिद्वयं वर्तते। आवरणशक्त्या ब्रह्मणः यथार्थस्वरूपं आवृतं भवति, विक्षेपशक्त्या विविधःप्रपञ्चः सृष्टिवैचित्र्यं प्रस्फुटितः भवति। अविद्यया आनन्दस्वरूपं ब्रह्म परिच्छिन्नं भवति। अपरिच्छिन्नं परब्रह्म अविद्यावत् परिच्छिन्नं प्रतीयते। यथा अच्छिन्ना पृथ्वी ग्रामक्षेत्राद्युपाधिभिः छिन्नवत् प्रतीयते। अतः मायया परिच्छिन्नः आत्मा ईश्वर-जीवादि रूपेषु प्रतीयते। परमार्थतः आत्मनः सर्वगतत्वात् तस्य परिच्छेदकाभावः।

अनया उपाध्या परिच्छिन्नस्य ब्रह्मणः ईश्वरत्वं, सर्वज्ञत्वं, जगतकारणत्वञ्च सिद्ध्यति, ब्रह्मणि स्वतः ईश्वरत्वादि व्यवहारोपपत्तिरसम्भवात्। "तदेवमविद्यात्म कोपाधिपरिच्छेदा --उपपद्यते"[10] । यथा घटकरकाद्युपाधिभिः अपरिच्छिन्नः आकाशः घटाकाशः, करकाकाशः इत्यादि परिच्छिन्नः अवभासते, तथैव अनवच्छिन्नः आत्मा देहेन्द्रिय-मनो-बुद्ध्याद्युपाधिभिः परिच्छिद्यमान् वद्भूत्वा जीवरूपेण व्यपदिश्यते। परवर्तिभिः आचार्यैः उपाधिभेदात् शुद्धचैतन्यं ब्रह्मणं जीवेश्वरसाक्षी त्रिरूपेषु व्याख्यातं। अतः क्रमशः एतेषां स्वरूपं विवेच्यते।

### जीवस्वरूपम्

जीवतीति जीवः, जीव् प्राणे धातोः निष्पन्नस्य जीवशब्दस्यार्थः वर्तते प्राणवान् चेतनतत्त्वम्। अद्वैतवेदान्त दृष्ट्या जीवः चैतन्य-कर्तृत्वभावनयोः सम्मिश्रणमस्ति। अर्थात् जीवे चैतन्यांशोप्यस्ति, कर्तृत्वांशोऽपि। आचार्यशङ्करेण ब्रह्मसूत्रभाष्ये जीवः परिभाषितः "अस्यात्माजीवाख्यः शरीरइन्द्रियपञ्चराध्यक्षः कर्मफलसंबंधी"[11] । आचार्यशङ्करः जीवं अविद्यावच्छिन्नचैतन्यमुक्तम्। अविद्या शरीरेन्द्रियअन्तःकरणानि च जीवस्योपाधयः सन्ति। "मनः उपाधिकश्च जीवः"[12], "जीवो बुद्ध्याद्युपाधिपरिच्छेदाभिमानि"[13] । आचार्यशङ्कराचार्यानुसारेण आत्मैव बुद्धौ प्रतिबिम्बितोभूत्वा जीवभावमाप्नोति।

रूपं रूपं प्रततीदं प्रतिफलनवज्ञात् प्रतिरूप्यं प्रपेदे ।
ह्येकोद्रष्टा द्वितीयोभवति च सलिले सर्वतोऽनन्तरूपः।.[14]

सुरेश्वराचार्योऽपि प्रतिपादितवान् यत् बुद्ध्युपहिच्चिदैव जीवः। "बुद्धितत्कारणोपाधि क्षेत्रज्ञेश्वरसंज्ञकौ"[15] । अर्थाद् बुद्ध्युपहित बुद्धितादात्म्यापन्नं बुद्धिगतः स्वाभासाविविक्तः चिदैव जीवः। "बुद्ध्युपाधिविविक्तश्च विज्ञानमय उच्यते"[16] । आचार्यअप्पयदीक्षितेन संक्षेपशारीरके उक्तम् – "कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः"[17] ।

आचार्यशङ्करः जीवब्रह्मणोरभेदं स्वीक्रियते,तेषां मते जीवः परमार्थतः ब्रह्मरूप एव। श्रुतौ जीवं अजः, नित्यः, अविकारी चोक्तः। "अजोनित्यः शाश्वतोऽयं पुराणः"[18] । अस्येदं तात्पर्यं नास्ति यत् भगवान्भाष्यकारः जीवब्रह्मणोः औपाधिकं भेदं नाङ्गीकुर्वन्ति, तेषां मते यथा उपाधिपरिच्छिन्नघटाकाशाद् अनुपाधिकापरिच्छिन्नः आकाशः भिन्नः तथैव अविद्याकल्पिताद् कर्ताभोक्ताविज्ञानाख्यजीवाद् परमेश्वरः भिन्नः। "परमेश्वरस्त्वविद्याकल्पिताच्छरीरात् कर्तृभोक्तुर्विज्ञानेत्याख्यादन्यः। यथा वा घटाकाशाद्पाधिपरिच्छिन्नादनुपाधिरपरिच्छिन्न आकाशोऽन्यः"[19]। एवमाचार्यशङ्करः जीवब्रह्मणोः पारमार्थिकमभेदं स्वीक्रियतेऽप्यनयोरौपाधिकभेदं स्वीक्रियते एव।

अत्र जिज्ञासा जायते यज्जीवः ब्रह्मरूप एव परमार्थतः ब्रह्मणः तस्य विभेदः नास्ति, तर्हि कथं जीवः ब्रह्मरूपे न दृश्यते। शंकरग्रन्थानामवलोकनेन प्रतीयते यत् आचार्यशंकरः जीवं एकं उपाधिवशाच्च नाना स्वीक्रियते। "एकमेकत्वं नानात्वं च हिरण्यगर्भस्य तथा सर्वजीवानाम्"[20] । अर्थात् जीवः हिरण्यगर्भवत् समष्टिबुद्ध्युपहितचैतन्यरूपे एक एव, नानाव्यष्टि बुद्ध्युपहितचैतन्यरूपे नाना प्रतीयते। अपरिच्छिन्नब्रह्म तु एक एव। उपाधिं बिना जीवस्य स्वतः कश्चिदाश्रयः नास्ति। यथोक्तं भाष्यकारेण- "न हि उपाधिसम्बन्धमन्तरेण स्व तः एव जीवस्याहारः कश्चित् संभवति, ब्रह्मव्यतिरेकेन स्वमहिमप्रतिष्ठत्वात्"[21] । जीवः वस्तुतः ब्रह्म एव। अतः भाष्यकारेण आत्माधिकरणभाष्ये[22] आत्मोत्पत्तिविषयिणी श्रुत्याभावात् जीवोत्पत्तिरसम्भवः उक्तः। श्रुतौ जीवस्य नित्यत्वं, अजत्वं, अविकारित्वं उपदिशति। "न जीवो म्रियते"[23], "न जायतेम्रियते वा विपश्चित् नाऽयं भूत्वाभविताव न भूयः, अजोनित्यो शाश्वतोऽयं पुराणो नहन्यते हन्यमाने शरीरे"[24], "तत्त्वमसि"[25] इत्यादि श्रुतिषु जीवोत्पत्तेः निषेधः श्रूयते। अनेन स्पष्टं यत् विशुद्धचैतन्यमेव अविद्यया आत्मस्वरूपं विस्मरति, नानात्वप्रपञ्चेन च तादात्म्यं स्थाप्य अहं सुखी, अहं दुखी, स्थूलोऽहं, कृशऽहमिति अवस्थाषु बध्नाति। आचार्यशंकरः अखिलमपि प्रपञ्चं कल्पितं स्वीकरोति। जीवः परमार्थतः मिथ्या सत्वेऽपि व्यवहारतः यथार्थः वर्तते। ब्रह्मसूत्रभाष्ये आचार्यः वदति –"अस्यात्मा जीवाख्यः शरीरेन्द्रिय प्रपञ्चराध्यक्षः कर्मफलसम्बन्धी"[26] ।

आचार्यः गीता-उपनिषद्-ब्रह्मसूत्रभाष्येषु सर्वत्रैव एतद् मतं प्रतिपादयन्ति। एतेषां मते जीवब्रह्मणोः ऐक्यज्ञानेन द्वैतनाशः सम्भवति। विनष्टश्चद्वैतः पुनः नोत्पद्यते। आत्मनः च स्वरूपज्ञाने सति अविद्याकल्पितस्य प्रपञ्चस्य नानात्वस्य निराकरणं सम्भवति। अनेन एव आचार्यशंकरः "जीवोब्रह्मैवनाऽपरः", "नेहनानास्ति किञ्चन्" साधयति।

### ईश्वरस्वरूपम्

शांकरदर्शने ब्रह्म-ईश्वरशब्दयोः अस्ति किञ्चिद्विशिष्टं महत्त्वम्। आचार्यशंकरः अद्वैतप्रवर्तकः आचार्यः, अतः तेषां मते परमार्थतः ब्रह्मएव परम् तत्त्वं, दृश्यमानं चेदं जगत् तस्यैव विवर्तः। "एकोऽहं द्वितीयोनास्ति, ब्रह्मसत्यं जगत्

मिथ्या" "एकमेवपरमार्थसत्यं ब्रह्म"[27] इति। अस्य ब्रह्मणः विवेचनमाचार्यःपारमार्थिकदृष्ट्या, व्यावहारिकदृष्ट्या च करोति। व्यावहारिकदृष्ट्या ब्रह्मणः यत् स्वरूपं तत् पारमार्थिकाद् भिन्नः वर्तते। आचार्यः वदति यस्य सामान्यस्य सीमितदृष्ट्या निर्गुणब्रह्मणः निर्विकन्पकं स्वरूपं तस्य बौद्धिकपरिधौ न आगच्छति, अतः तस्मिन् असीमब्रह्मणि अनन्तशक्तित्व,सर्वव्यापकत्व, कर्तृत्वादि अलौकिकगुणानां समावेशः क्रियते। तदा सः सगुणः, सविशेषः, अपरब्रह्म चोच्यते। निर्गुण, निरुपाधिक, निर्विशेष ब्रह्म मायावच्छिन्ने सगुणः, सोपाधिकः, सविशेषश्च भवति, सैवेश्वरपदवाच्यः। आचार्यशंकरः इदमङ्गीकृतं यत् ब्रह्मैव अनिर्वचनीयशक्त्या मायया विभूषितः सा च माया अस्य जगतः उपादाननिमित्तकारणञ्च वर्तते। तदा सः सगुणब्रह्म, अपरब्रह्म वोच्यते[28]।

आचार्य शंकरानुसारेण ईश्वरः अखिलजगतः स्वामिः,कर्मफलदाता चास्ति। परब्रह्म एतेभ्यः गुणेभ्यः रहितः,ईश्वरः व्यावहारिकदृष्ट्या सत् परब्रह्म तु पारमार्थिक सदिति। "परमार्थसत्यं ब्रह्म" [29]"परमार्थतत्त्वं ब्रह्म"[30] । ईश्वरः ज्ञाताज्ञानज्ञेयत्रपुटी युक्तः ससीम च भवति। "ज्ञान-ज्ञातृ-ज्ञेयभेदं रहितं परमार्थतत्तवदर्शनम्"[31] । अस्येश्वरस्योपाधि वर्तते मायेति। इयं चमाया ईश्वरस्य सृजनात्मिका शक्तिरस्ति। "ब्रह्मैव स्वशक्ति प्रकृत्याभिधेयम् आश्रित्य लोकान् सृष्ट्वा नियन्तृत्वादीश्वरः"[32] । ईश्वरः नित्यः, शुद्धः, बुद्धः, स्वतन्त्रः, सर्वज्ञश्चास्ति। सः मायायाः सत्त्वगुणावच्छिन्नः सः भोक्ता नास्ति, सः नित्यसाक्षिस्वरूपेण जीवानां सुखदुखं पश्यति। यथोक्तं मुण्डकोपनिषदि - "ईश्वरोनित्यशुद्धबुद्धमुक्तस्वभावःसर्वज्ञः सत्त्वोपाधिः ईश्वरोनाश्नाति। प्रेरयिता ह्यसावुभयोः भोज्यः भोक्तोः नित्यसाक्षित्व सन्तामात्रेण"[33] ।

आचार्यशंकरस्य कथनेनेदं स्पष्टं यत् ब्रह्मैवेकं सत्, अव्ययत्वात्, अस्तित्ववत्वाच्च तस्य सत्त्वतं नित्यत्वञ्च सिद्धम्। ईश्वरस्तु सम्भूतः सत् । अस्येदं तात्पर्यं नास्ति यत् ईश्वरे सत्त्यत्वाभावःअपितु ईश्वरस्य सत्यत्वं तादृशमेव यादृशं जगज्जीवप्रपञ्चानां सत्यत्वं येषामयं स्वामिः इति। आचार्यशंकरः मायां सर्वशक्तिसम्पन्नस्येश्वरस्यैवशक्तिः स्वीकरोति। सः स्व अनिर्वचनीय दिव्यशक्त्या जगत्सृजति। अतः अस्याः शक्तेः अपि आचार्यशंकरदर्शने अस्ति किञ्चिद् विशिष्टं महत्त्वम्। यतो हि शक्तिं बिना नास्ति ईश्वरः जगत्स्रष्टा। अत एव भाष्यकारैः प्रतिपादितं यत् – "न हि तयां बिना परमेश्वरस्यस्रष्टत्वं सिद्धयति अविद्यात्मिका हि बीजशक्तिः। अव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मयामयीमहासुषुप्तिः यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवः"[34] । अन्यत्रापि यथोक्तं – "मायोपहितचैतन्यमीश्वरचैतन्यम्"

"अव्यक्तनाम्नी परमेशशक्तिः अनाद्यविद्या त्रिगुणात्मिका परा
कार्यानुमेया सुधियैवमाया ययाजगत्सर्वमिदं प्रसूयते"[35]

संक्षेपेण वक्तुं शक्यते शंकरदृष्ट्या जगतः सत्ता केवलं प्रातिभाषिकं नास्ति। शुक्तिरजत्वत् क्षणिकाभावात्। जगतः सत्तापुनः पारमार्थिकोऽपि नास्ति, परमार्थतः अद्वैतब्रह्मणः एव सत्यत्वात्, नानात्वस्य मिथ्यात्वात्। अनयोः मध्ये ईश्वरस्यास्तित्वं व्यावहारिकं सिद्ध्यति यत् सत्यमपि असत्यमपि अर्थात् अनिर्वचनीयम्। "नामरूपे तत्वान्यत्वाभ्यामनिर्वचनीयमिति"[36] ।

### साक्षीस्वरूपम्

शांकरवेदान्ते साक्षी चैतन्यस्यैवावस्थाविशेषः, यः खलु जीवेश्वरयोः मध्ये स्थितः अस्ति। यत्रेश्वरः मायोपाधिकचैतन्यरूपः, जीवश्च अन्तःकरणावच्छिन्न चैतन्यरूपः, तत्रैव अन्तःकरणोपहितं चैतन्यं साक्षीरूपमिति अद्वैतिनां सिद्धान्तः।

तत्र शांकरवेदान्तपरम्परायां साक्षिशब्दस्य मूलस्रोतः किमिति जिज्ञासायां यद्यपि उपनिषद्द्रष्टारः ऋषयः आत्मेश्वरानुभवजन्यानन्दे निमग्नाः भवन्ति स्म, तेषां तत्त्वज्ञानस्य सैद्धान्तिकनिरूपणे लेशतोपि प्रवृत्तिर्नासीत्। तथापि सत्यमिदं यत् सकलसैद्धान्तिकविवेचनानां स्रोतांसि उपनिषत्सु इतस्ततः प्रकरणेषु समुपलभ्यन्ते एव। अद्वैतवेदान्ते स्वतन्त्ररूपेण साक्षी शब्दस्यावधारणा कालान्तरे विकसिता जाता। उपनिषत्सु तु साक्षी पदस्य प्रयोगः यौगिकपदेषु अभवत्। बृहदारण्यकोपनिषदः मूलसारः "यत्साक्षादपरोक्षाद् ब्रह्म[37]" एव साक्षी पदस्यावधारणायाः मुख्यं सूत्रमस्ति। अर्थात् सर्वत्र व्याप्ततत्त्वं सर्वान्तरात्मा ब्रह्मैवेति। अत्र साक्षादिति पदं स्पष्टतया साक्षिणं नहि संकेतयति केवलमपितु अनेन ब्रह्मसाक्षिणोः उभयोः संकेतग्रहः संभवति। श्वेताश्वतरोपनिषदि भाष्ये वा सर्वप्रथमं साक्षिस्वरू¬पं वर्णितमस्ति। "एको देवः सर्वभूतेषु गूढः सर्वव्यापि सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासःसाक्षी चेता केवलो निर्गुणश्च "[38]शारीरकभाष्यारम्भे सत्यानन्दीदीपिकायां प्रत्यगात्मानमन्तः करणस्य सर्वासां वृत्तिनां साक्षी 'सर्वसाक्षिणमि' त्यनेन विशेषितम्- "अहं प्रत्ययिनमशेषस्वप्रचारसाक्षिणि प्रत्यगात्मनि अध्यस्य तं च प्रत्यगात्मानं सर्वसाक्षिणं तत् विपर्ययेणान्तःकरणादिष्वध्यस्यति39"। आचार्येण गोविन्दानन्देन भगवत्पादोक्त 'साक्षिणमि'ति शब्दस्याभिमतं प्रकाशितं रत्नप्रभायां- "अज्ञातप्रत्यग्रूपे साक्षिणि.."[40] साक्षिशब्दस्य व्युत्पत्तिः पाणिनिसूत्रे साक्षाद्रष्टा अर्थे कृता। यथा "अद्वितीयो देवो द्योतनस्वभावः सर्वप्राणिषु संवृतः। कर्माध्यक्षः सर्वप्राणिकृत विचित्र कर्माधिष्ठाता । सर्वप्राणिषु वसति। सर्वेषां भूतानां साक्षी सर्वद्रष्टा। साक्षात्द्रष्टरि संज्ञायां"[41] । 'साक्षात्' द्रष्टरि संज्ञायां इत्यनेन सूत्रेण द्रष्टा इत्यस्मिन्नर्थे साक्षादित्यव्ययपदाद् इनि प्रत्यये कृते साक्षी शब्दः निष्पन्नः। अत एव साक्षिलक्षणं निष्पन्नं 'द्रष्टृत्वे सति उदासीनत्वं साक्षित्व'[42] मिति अर्थात् जगति उदासीनता बोधकत्वादस्य साक्षित्वं सिद्धम्। लोकेऽपि द्वयोः पुरुषयोः वादे सति स एव साक्षी भवति यः अनयोः वादस्य साक्षात् द्रष्टा, ज्ञाता च सत्त्वेपि स्वयं उदासीनश्च स्यात्। इदमवधेयं यत् नहि केवलमुदासीनत्वमेव साक्षिलक्षणं न च केवलं द्रष्टृत्वमेवसाक्षिलक्षणं वक्तुं शक्यते। केवलमुदासीनत्वमेव साक्षिलक्षणमुच्यते चेत्, अनेके स्तम्भादयः तत्र उदासीनाः भवन्ति, तत्र लक्षणस्य प्रसक्तिः भविष्यति अतः लक्षणे द्रष्टृत्वमुक्तं, न तत्र स्तम्भादौ द्रष्टृत्वं संभवति। पुनः द्रष्टृत्वमेव साक्षिलक्षणमुच्यते चेत् तर्हि ययोः वादः प्रचलति तावपि तस्य वादस्य विवादस्य वा द्रष्टारौ भवतः। परं नहि तौ साक्षिणौ भवतः। अतः साक्षिणः 'द्रष्टृत्वे सति उदासीनत्वं साक्षित्वमि'ति लक्षणं युक्तियुक्तमेवेति। अत्र पुनः साक्षी द्रष्टा अर्थाद् दर्शनकर्ता दर्शकः इत्यर्थः। इत्यत्र साक्षिणः कर्तृत्वेन दर्शनक्रियायाः कारणत्वाद् अवश्यमेव साक्षी विकारी स्यात्, कथं साक्षिविकाररहितः निर्विकारी भवितुमर्हतीति जिज्ञासायामुच्यते - साक्षिणि कर्तृत्वमारोपितमात्रमेव नहि तत्र कर्तृत्वं पारमार्थिकम्। यथा– प्रकाशमयः भानुः कर्तृत्वभावनया मुक्तः भवति, परं सूर्यः प्रकाशितो भवति, प्रकाशयति वा इति प्रकाशकर्तृत्वस्यारोपः भानौ क्रियते, तथैव दृश्यस्वरूपसाक्षिणि द्रष्टृत्वं दर्शनकर्तृत्वं आरोप्यते। वस्तुतः साक्षी कर्तृत्वभोक्तृत्वाभ्यां भिन्नः उदासीनः ज्ञाता च भवति। अत एव साक्षिणं कूटस्थोऽपि उच्यते।

मिथ्याबुद्धौ चैतन्यावभासे वा यः निर्विकारः असंङ्गो वा चैतन्यं तिष्ठति, तस्य चैतन्यस्य साक्षित्वात् कूटस्थ उच्यते। यथोक्तं – "कूटे कपटे साक्षित्वे यस्तिष्ठति सः कूटस्थः"[43] ।अर्थाद् यः कूटः निर्विकारः स्यात् सः कूटस्थ एव साक्षी। साक्षी अपरिणामित्वात् कूटस्थः। अत एवोक्तं "स्वसमसत्ताक रूपान्तमापद्यते यः तदन्यस्येत्यर्थः"[44] । अर्थात् यथा प्रमाता सुखादिरूप 'अहं सुखी' इत्याकारकं स्वसमसत्ताकपरिणाममाप्नोति तथा कूटस्थ साक्षी तु न भवति, स तु सदैव एकरसः सर्वदृश्यभासकः एव भवति। यथाचोक्तं - "तस्य कूटस्थचिद्रूपस्य सर्वसाक्षित्वेन स्वभिन्नं सर्वं प्रत्यनुभवरूपतया अभिषिक्तत्वात् लाघवतर्कगङ्गाजलेन संशोध्य सर्वान्प्रति ज्ञापितत्वात्"[45] । तथा च "एतत् कूटस्थस्य साक्षित्वं अविद्याविसलितत्वात् अविद्याप्रयुक्तत्वात्"[46] इति। देहद्वयाधिष्ठानभूतं स्वावच्छेदकस्य देहद्वयस्य स्थूलसूक्ष्मशरीरस्य साक्षाद् द्रष्टा कर्तृत्वादिविकारशून्यं कूटस्थचैतन्यमेव साक्षी उक्तम्। सिद्धान्तलेशसंग्रहे आचार्यैः यथा प्रतिपादितम् "देहद्वयाधिष्ठानभूतं स्वावच्छेदकस्य देहद्वयस्य साक्षादीक्षणान्निर्विकारत्वाच्च साक्षीत्युच्यते"[47] । विद्यारण्यमुनिना पञ्चदश्यां त्रिषु अध्यायेषु साक्षीस्वरूपं निर्दिष्टं – तत्र कूटस्थदीपे तैः प्रतिपादितं इदं कूटस्थचैतन्यं चिदाभासविशिष्टाहंकाररूपजीवभावस्य अधिष्ठानमस्ति, अतः इदं न तु

*जीवकोटौ प्रविष्टः नैव ब्रह्म कोटौ, जीवेश्वरयोः विभागस्य अनाश्रितभूतकूटस्थचैतन्यमेव साक्षी।*

*"देहेन्द्रियादि युक्तस्य जीवाभासभ्रमस्य या ।*
*अधिष्ठानचितिः सैषा कूटस्थाऽत्र विवक्षिता"*[48]

*अत्र यद् चिदाभासस्य जीवस्य साक्षित्वमनङ्गीकृत्य कूटस्थं साक्षी अङ्गीकृतं तन्न कल्पितमात्रम्-*

*"अन्तःकरणं तद्वृत्ति साक्षीचैतन्यविग्रहः।*
*आनन्दरूपः सत्यः सन् किं नात्मानं प्रपद्यते"*[49] ॥

*इति भाष्यकारस्य वचनानुरोधेन कूटस्थस्य साक्षित्वं विनिश्चितमिति। विद्यारण्यमुनिनाऽपि पञ्चदश्यां अधिकं स्फोरितं यत् कर्ता, क्रिया, दृग्भिन्नं अर्थादहमाभिमानिजीवभिन्नं बाह्याभ्यन्तरक्रियाभिन्नं अथ च दृग् (अनुभविता प्रमाता) भिन्नं परस्परं विलक्षणं सर्वविषयान् दृश्यपदार्थान् नित्यचैतन्यस्य यः रूपः प्रकाशयति सैव साक्षी ।*

*कर्तारं च क्रिया तद्वद् व्यावृत्तविषयानपि ।*
*स्फोरयेदेकयत्नेन योऽसौ साक्ष्यत्र चिद्वपुः।।*[50]

*अद्वैतवेदान्ते साक्षिस्वरूपस्यावधारणायाः किञ्चिद्विशिष्टं महत्त्वं वर्तते। यतो हि साक्षिणैव ज्ञाताज्ञात, यथार्थायथार्थादीनि वस्तूनि प्रकाशितानि भवन्ति। युक्तितः एकमेतादृशं चैतन्यं अवश्यमेवाङ्गीकर्तव्यं, येन अज्ञातोऽपि वस्तु ज्ञातं स्यात्। अर्थात् प्रमातारं यः अज्ञातः विषयः भवति, सोपि साक्षिणा ज्ञातः भवति। यदा वयं कस्यचिदपि वस्तुनः प्रत्यक्षं कुर्मः तदा प्रतीयते यत् तद्वस्त्वत्रासीत्, परमस्माकं तस्य ज्ञानं नासीत् अर्थाद् वस्तुनः उत्पत्तिः ज्ञानात्प्राक् भवति न तु ज्ञानेन सह, आदौ वस्तूत्पद्यते अनन्तरं तस्य ज्ञानं जायते। अन्यथा ज्ञानकल्पनयोः अभेदप्रसंगः। ज्ञानं तु भूतवस्तुविषयकं सिद्धवस्तुविषयकं वा भवति। कल्पनया च वस्तुनां सृष्टिः भवति। अतः अद्वैतवेदान्तमते प्रमातारमज्ञातः वस्त्वपि साक्षिणा ज्ञातः भवतीति। एवमेव प्रमात्रा मिथ्यात्वेन तिरस्कृतानामपि वस्तुनां साक्षिण आभासः भवत्येव। तात्पर्यमिदं यत् साक्षी सर्वज्ञः सर्वप्रकाशकः भवति। अत्रेदं वैशिष्ट्यं यत् - साक्षिणः सर्वज्ञत्वेऽपि नहि साक्षी निर्णायकः प्रमाता वा भवति। स तु निष्पक्षः, निष्पक्षत्वाच्च साक्षिणं सदसद्, ज्ञाताज्ञात उभावेव भासितः भवति। साक्षी यथा रज्जुं पश्यति, तथैव सर्पमपि, रज्जुसर्पयोः भेदं न पश्यति। किन्तु प्रमातरं तथा न भवति, प्रमातुः काचिदेका विशिष्टा दृष्टिर्भवति, साक्षिणः कार्यं तु साक्ष्यप्रदानमेव अर्थात् वस्तुस्वरूपदर्शनं ज्ञानमेव, सत्यं वा भवतु, असत्यं वा भवतु भेद प्रदर्शनं नास्ति साक्षिणः कार्यं, अर्थात् इयं रज्जुः अयं सर्पः अनयोः इदं सत्यं इयं मिथ्येति। अतः अज्ञानं तज्जन्यवस्तूनां सामान्यग्राहकः भवति साक्षी, तस्य चैतन्यस्वरूपत्वात् स्वप्रकाशत्वाच्च अज्ञानं तत्कार्याणाञ्च ग्रहणे तं नास्त्यपेक्षा कस्यचिदन्यस्य साधनस्य इति। तत्र किं प्रयोजनमस्य साक्षीस्वरूपस्याङ्गीकारे - साक्षिणः अस्तित्वं तु तावदेव तिष्ठति यावत् अविद्या, माया वर्तते, ब्रह्मानुभवश्च नास्ति, साक्षी तावदेव सत्यं यावद् जीवः जगद् ईश्वरः। चैतन्यस्य एताः विविधाः प्रतीतयः व्यावहारिकी न तु पारमार्थिक्यः। परमार्थतः ब्रह्मणि एव सर्वेषां समाहारः भवति। ब्रह्मव्यतिरिक्तं एतेषां तु तात्विकी सत्तैव नास्ति। तर्हि किमर्थं साक्षी स्वीकृतः अद्वैतिभिः, इति जिज्ञासायां उच्यते- जीवः यदा अनात्मवस्तुभिः -इन्द्रिय- मन- देहादिभिः तादात्म्यं स्थापयति, तदा तस्य यत् स्वाभाविकं स्वरूपं वर्तते तत् अस्तित्वविहीनवत् प्रतीयते मेघाच्छादितभानुवत्, तत्र कर्मबद्धः भवति जीवः, कर्मबद्धत्वात् कर्मफलभोगः एव तस्य नियतिः, कर्मणां पुनः जडत्वात् फलप्रदाने असमर्थाः भवन्ति, अतः कर्मफलप्रदातृत्वेन कस्यचिदेकस्य सत्तायाः अपेक्षा प्रतीयते, तत् कृते आचार्यशंकरः ईश्वरं स्वीकरोति, किन्तु ईश्वरः कथं जीवस्य कर्मणां साक्षीभवतीति जिज्ञासानिवृत्तये एव सम्भवतः आचार्यशंकरः साक्षिणः अवधारणां प्रस्तौति। स च ईश्वरस्यैव एकः रूपः वर्तते। यः अन्तःकरणोपाधियुक्तत्त्वेपि अन्तःकरणेन सह तस्य तादृशः एव संबन्धः यादृशः घटाकाशस्य घटेन सह। घटाकाशः यथा घटस्य गुणदोषेण लेशतोऽपि असम्बद्धः, तथैव साक्षी अपि अन्तःकरणस्य मालिन्येन असम्बद्धः निष्प्रभावितः भवति। अयं च साक्षी जीवस्य सर्वान् सुकृत्यान्, दुष्कृत्यान् च निरपेक्षभूत्वा अनासक्तभावेन पश्यति। अस्यैव साक्षित्वञ्च प्रमाणं मत्वा ईश्वरः कर्मफलं ददाति।*

*तत्र जीवः शरीरञ्च उभावेव अज्ञानजन्यत्वाद् अप्रकाशस्वरूपौ स्तः। अतः अनयोः अवभासनाय साक्षीस्वरूपं स्वयं प्रकाशचैतन्यं स्वीकरोति। साक्षीस्वरूपाङ्गीकारस्येदमेव प्रयोजनम्। किन्तु अन्तःकरणवृत्तीनां प्रकाशस्वरूपत्वात् जीवस्य देहस्य वा अवभासमानः तु सिद्धः। अतः साक्षिणः स्वीकृतिस्तु व्यर्थ एव, इति आक्षेपः। तत्र आचार्यशंकरस्याभिमतमस्ति यद् अन्तःकरणस्य जडत्वात् तद्वृत्तयः तत् परिणामोऽपि जड एव, जडत्वाच्च परिणामस्य तमःस्वरूपान्तःकरणस्यवृत्तयः स्वस्य प्रकाशनाय चैतन्यमपेक्षते। अतः जीवस्य स्थूलसूक्ष्मशरीरं प्रकाशननिमित्तं साक्षीस्वरूपमङ्गीक्रियते। पुनश्च जडस्वरूपान्तःकरणस्य वृत्तयः जीवशरीरान्तःकरणस्य च सुखदुखादिधर्माणामवभासने असमर्थाः भवन्ति, अतः अन्तःकरणस्य सुखदुखादिधर्माणा -मवभासकत्वेन साक्षिणः अस्तित्वमवश्यमेवाङ्गी कर्तव्यमिति। तत्र अन्तःकरणस्य वृत्तयः, अन्तःकरणस्य सुखदुखादिधर्माश्च साक्षिणः एव विषयाः न तु अन्तःकरणवृत्ती –नामिन्द्रियाणा51 अन्तःकरणस्य वृत्तयः साक्षीचैतन्यस्यैवालोकेनालोकितः भवति, यदा अन्तःकरणस्य वृत्तौ चैतन्यस्य प्रकाशः प्रतिबिम्बितो भवति तर्हि तेन प्रतिबिम्बितमन्तःकरणं तद्वृत्तिश्च प्रकाशवत्प्रतीयते, साक्षीचैतन्यालोकेना-लोकितान्तःकरणवृत्तिः स्वविषयं प्रकाशयति। अतः वृत्तेःप्रकाशकः स्वयंप्रकाशसाक्षी-चैतन्यमिति स्वीकर्तव्यम्। अन्यथा अचेतनान्तःकरणवृत्त्या विषयावभासः न संभवति। अद्वैतमते जगति प्रमाणप्रमेयप्रमातृनामरूपादिना अभिव्यज्यमाणाः सकलभावा-भावपदार्थाः यतकिञ्चिदपि सर्वंजगत् साक्षिणः साक्ष्ये एव सिद्धाः सन्ति। साक्षिणः साक्षित्वं तु स्वतः सिद्धम्। साक्षिणः साक्षित्वसाधनाय कश्चिदन्यः साक्षी स्यादिति चेत् तस्यचान्यः इत्यनवस्था स्यादिति। अतः स एव सर्वेषां प्रमाणानां मूलं, स तु स्वेनैवानुभूयते। अस्माद्भिन्नं नास्ति अन्यः कश्चित्साक्षी । यथाचोक्तं भगवता शंकरेण विवेकचूडामणौ -*

*असौ स्वसाक्षिको भावो यतः स्वेनानुभूयते ।*
*अतः परं स्वयं साक्षात् प्रत्यगात्मा न चेतरः।।*[52]

*अत्र जिज्ञासा जायते यत् साक्षिणः त्रिकालाबाधित्वे निरपेक्षत्वे सति ब्रह्मणः अपि त्रिकालाबाधित्वे निरपेक्षत्वे च सति ब्रह्मसाक्षिणोः उभयोरपि निरपेक्षत्वे सत्यत्वे च सति भवति द्वैतापत्तिः। तर्हि उच्यते– साक्षी जीवेश्वरादिवत् विशुद्धचैतन्यस्यैव एकः रूपः वर्तते, यश्च परमार्थतः ब्रह्मस्वरूपे सति व्यवहारतः निखिलजागतिकप्रपञ्चस्य द्रष्टा वर्तते। यथाचोक्तं सर्वज्ञात्ममुनिना ।*

*निजमायया परिगतः पुरुषपरतन्त्रया तु निजया प्रभया।*
*परिकल्पितं सकलमाकलयन् स हि साक्षितामुपगतो भवति।।*

*अर्थात् विशुद्धचैतन्यं ब्रह्म स्वाश्रितमायोपहितं भूत्वा स्वस्मिन्नैव कल्पितं प्रपञ्चं सृजति तस्यां प्रपञ्चाकाराविद्याया वृत्तौ ब्रह्मणः एव यः चिदाभासः तेनैव निखिलमपि प्रपञ्चं प्रकाशयति। अत्र यद्यपि ब्रह्म-साक्षिणोः एकत्वं प्रतिभाति, किन्तु नेदं यक्तियुक्तम्। यतो हि ब्रह्मणः निरपेक्षसत्तास्ति, यद्व्यतिरिक्तं कस्यचिदपि प्रपञ्चस्य सम्भावनापि न विद्यते। परं साक्षाकृते तु साक्षीतरसत्ता अपेक्षितः भवति। साक्षीतरसत्तां बिना साक्षी निरर्थकः भवति। दृश्याभावे दर्शनमदर्शनं वा अर्थहीनः। ब्रह्मेतरदृश्याभावान्नास्ति ब्रह्म द्रष्टा। ब्रह्मेतरदृश्यं तु अविद्याकृतं ।साक्षिणः अवधारणा तु अविद्यां विना न संभवति। द्रष्टृदृश्ययोः भेदस्य अविद्या कल्पितत्वात् दृश्यं बिना कुतः साक्षी इति।*

*साक्षिणः पुनः उदासीनत्वात् न जीवः साक्षी न चेश्वरः। यथा कर्तृत्वाद्यभिमानयुक्तत्वात् संसारी जीवः न उदासीनः, तथैव सृष्टिस्थितिलयस्य कर्ता ईश्वरोऽपि उदासीनः नास्ति। अतः साक्षिणः जीवेश्वरयोः पृथक् सत्ताऽस्ति। "जीवात् भेदेन दर्शितः" इति पंचदशी। "साक्षी यथा जीवकोटिर्नभवति जीवस्य उदासीनत्वाभावात् तथा ईश्वरकोटिरपि न भवति, जगत् सृष्टिनियमनादिव्यापारकर्तुः तस्य उदासीनत्वाभावात्"*[53] । *भगवता भाष्यकारेणापि उद्धाटितं यत् साक्षीचैतन्यं निरुपाधिकब्रह्मचैतन्यस्यावगतिः नास्ति, निरुपाधिकब्रह्मचैतन्यं तु अवाङ्मनसगोचरः। निरुपाधिकब्रह्मचैतन्यमेव संसारदशायां उपाधिभेदेन ईश्वरजीवसाक्षीभेदेन त्रिषु रूपेषु विभक्तम्। एवं पारमार्थिकदृष्ट्या ब्रह्म, ईश्वर, जीव, साक्षी इति शब्देषु एकस्यैव तत्त्वस्य स्थिति सत्त्वेऽपि अस्ति कश्चित् भेदः। यथा - निरुपाधिकं चैतन्यं ब्रह्म, मायोपहितं ब्रह्मैव ईश्वरः, जगतः कर्तृत्वभोक्तृत्वाद्यभिमानयुक्तः जीवः, एतेभ्यः भिन्नः न कर्ता, नभोक्ता, न च स्रष्टा साक्षी।*

## *उपसंहार*

*संक्षेपेण वक्तुं शक्यते यत् - यदा वयं मानवीयमनुभूतिं पश्यामः तस्य विश्लेषणञ्च कुर्मः तर्हि ज्ञायते यद् वाल्यावस्थादारभ्य वृद्धावस्थापर्यन्तं अस्मासु एकस्य अह मित्यस्यै वावच्छिन्नानुभूतिः विद्यमाना भवति। अस्यानुभवस्यानुभविता अस्ति कश्चिदेकः विशुद्धचैतन्यः। सैव चैतन्यः तदाचिदुपाधिभेदाज्जीवः, कदाचिदीश्वरः,कदाचिचिच साक्षीति भवतीति। सः निर्विशेषबोधः निर्विकारः द्रष्टा च। इत्यलम्।*

*संक्षेपेण वक्तुं शक्यते यत् - यदा वयं मानवीयमनुभूतिं पश्यामः तस्य विश्लेषणञ्च कुर्मः तर्हि ज्ञायते यद् वाल्यावस्थादारभ्य वृद्धावस्थापर्यन्तं अस्मासु एकस्य अह मित्यस्यै वावच्छिन्नानुभूतिः विद्यमाना भवति। अस्यानुभवस्यानुभविता अस्ति कश्चिदेकः विशुद्धचैतन्यः। सैव चैतन्यः तदाचिदुपाधिभेदाज्जीवः, कदाचिदीश्वरः,कदाचिचिच साक्षीति भवतीति। सः निर्विशेषबोधः निर्विकारः द्रष्टा czãA इत्यलम्।*

## सन्दर्भ


1. *गौडपादकारिका का.*45
2. *ब्रह्मसूत्रशांकरभाष्यम्* 2/1/9
3. *विवेकचूडामणि* 239
4. *विवेकचूडामणि* 242
5. *तैतरीयोपनिषद् भाष्यम्* 2-1
6. *तैतरीयोपनिषद् भाष्यम्* 2-1
7. *सर्ववेदान्तसिद्धान्तसारसंग्रहः पृ* 189
8. *छान्दोग्योपनिषद्* 3-14-2
9. *मुण्कोपनिषद् शांकरभाष्यम्* 3-1-17
10. *ब्रह्मसूत्रशांकरभाष्यम्* 2-1-14
11. *ब्रह्मसूत्रशांकरभाष्यम्.* 2-3-17
12. *ब्रह्मसूत्रशांकरभाष्यम्.* 1-3-14
13. *ब्रह्मसूत्रशांकरभाष्यम्.* 1-2-6
14. *शतश्लोकी श्लोक* 15
15. *बृह. भा.वा.* 1-4-6-6
16. *तदेव*
17. *सि.ले.संग्रह पृ* 58
18. *कठो.* 2-10
19. *ब्रह्मसूत्रशांकरभाष्यम्* 1-1-17
20. *वृहदारण्यकोपनिषद्* 1-4-6
21. *ब्रह्मसूत्रशांकरभाष्यम्.* 3-2-7
22. *ब्रह्मसूत्रशांकरभाष्यम्.* 2-3-17
23. *छान्दोग्योपनिषद्* 6-11-3
24. *कठोपनिषद्* 2-18
25. *छान्दोग्योपनिषद्* 6-8-7
26. *ब्रह्मसूत्रशांकरभाष्यम्* 2-3-17
27. *तैतरीयोपनिषद् शांकरभाष्यम्*
28. *ब्रह्मसूत्रशांकरभाष्यम्* 4-3-14, 1-1-2
29. *तैतरीयोपनिषद् शांकरभाष्यम्*
30. *भगवद्गीता शांकरभाष्यम्*
31. *केनोपनिषद्शांकरभाष्यम्* 1-5
32. *ब्रह्मसूत्रशांकरभाष्यम्*
33. *मुण्डकोपनिषद्शांकरभाष्यम्*
34. *ब्रह्मसूत्रशांकरभाष्यम्* 1-4-3
35. *विवेकचूणामणि* 109
36. *ब्रह्मसूत्रशांकरभाष्यम्.*
37. *वृहदारणयकोपनिषद्.* 3-4-1 ।
38. *श्वेताश्वतरोपनिषद्.* 6-11
39. *ब्रह्मसूत्रशांकरभाष्यम्. सत्यानन्दी पृ* 17 ।
40. *रत्नप्रभा पृ.*54
41. *पाणिनिसूत्र* 5-2-91
42. *सिद्धान्तलेश संग्रहः*
43. *न्याय. रत्ना. पृ* 144
44. *न्याय. रत्ना. पृ* 142
45. *न्याय. रत्ना. पृ* 145-146
46. *न्याय. रत्ना. पृ* 146
47. *सिद्धान्तलेशसंग्रहः प्र.परि.पृ* 180
48. *पंचदशी कू.दी. प्र.* 8-48, 8-58
49. *उपदेशसहस्त्री*
50. *पंचदशी* 10-9
51. *सिद्धान्तलेशसंग्रहः प्रथम परिच्छेद* 180)
52. *विवेकचूणामणि .* 218
53. *सिद्धान्तलेशसंग्रहः पृ* 243